## Appendix - VI

### A list of Subhāṣitas

1 अनात्मनः सर्वलोकोऽपि भयमस्ति गृहेष्वपि।
कुतो भयं ह्यात्मवतां किं पुनर्गौतमान्तरे॥ (167-27)

2 अपत्याद्युपकारेण पित्रोः प्रीतिर्यथा भवेत्।
तथा नान्येन केनापी जगत्येतद्धि विश्रुतम्॥ (148·16)

3 अपत्येषु विरुद्धेषु जननी नैव कुप्यते॥ (81·18)

4 अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः।
स्वार्थमुद्धरते प्राज्ञः स्वार्थभ्रंशो हि मूर्खता॥ (152-16)

5 अपूज्यपूजने चैव पूज्यानां चाप्यपूजने।
नरः पापमवाप्नोति महद् नात्र संशयः॥ (39·28)

6 अभ्यागतं श्रान्तमनुव्रजन्ति देवाश्च सर्वे पितरोऽग्नयश्च।
तस्मिन् हि तृप्ते मुदमाप्नुवन्ति गते निराशेऽपि च ते निराशाः॥ (80-52

7 अपेक्षिताप्राप्तितो हि देहिनां मरणं वरम्।
अनुरूपजनत्यागो पातकान्तो न विद्यते॥ (107·34

8 अयमेवोचितो मन्त्रो शत्रूणां पराभवः।
द्वेष्याः सर्वात्मना द्वेष्या इति नीतिविदो विदुः।
न विश्वास्या न चाऽऽस्थेया नैव मन्त्र्याश्च शत्रवः॥ (1.6-16, 17)

9 अर्भका युवयोः को वा आयुषोऽन्ते न हन्यते। (183-10)

10 अवध्यां च स्त्रियं प्राहुस्तिर्यग्योनिगतेष्वपि। (4.80)

11 अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः। (206.48)

12 असंपूर्णे स्वधर्मे हि किमनिष्टं न जायते। (122.60)

13 अहो भूयात्तु कस्यापि कन्या दुःखैककारणम्।
मरणं जीवतोऽप्यस्य प्राणिनस्तु पदे पदे॥ (131-5)

14 आगच्छन्तं महात्मानं यो मोहान्नोपतिष्ठते।
न तस्य कोऽपि त्राताऽस्ति पापिनो लोकयोर्द्वयोः॥ (172.67)

15 आत्मार्थं यस्तु याचेत स शोच्यो हि सुरेश्वरौ।
जीवितं सकलं तस्य यः परार्थोद्यतः सदा॥ (125.36)

16 आदौ तु पत्नी भरणात्तु भार्या जनेस्तु जाया स्व
(स्तु in S mss.) गुणैः कलत्रम्। ( (144.18)

17 आर्तस्य पुरुषस्येह भार्यावद्भेषजं न हि (129.110)

18 उपकारेऽपकारे च प्रसरावित संगतौ।
उपकारिषु सर्पोऽपि करोत्युपकृतिं पुनः॥
अपकारिषु यः साधुः पुण्यभाक्स इहाहतः। (80-54, 55)

19 एकस्यार्थे तु यो हन्यादात्मनो वा परस्य वा।
स हन्ता प्राणिनोऽनन्तं भवेत्तस्यैव पालकम्॥
सुखमेवान्त बहवो यस्मिंस्तु निहतेऽशुभे
तस्मिन्हते नास्ति भद्रे पालकं चोपपालकम्॥ (4.82-83)

20 एकान्तस्थितयोः स्वैरं जल्पतोर्यः सरागयोः ।
दंपत्योः शृणुयाद्वाक्यं निरयात्तस्य नोद्धृतिः (128.11)

21 एकेन यत्कृतं कर्म तस्मादर्धफलं भवेत् ।
जायया तु कृतं नाथ पुष्कलं पुरुषो लभेत् ॥
तस्मादेतत्सुविदितमर्धो जाया इति श्रुतेः । (129.61,62)

22 कुलदेव सुजातानां लक्षणं भुवि देहिनाम् ।
कृपार्द्रं यन्मनो नित्यं तेषामप्यहितेषु हि ॥ (170.83)

23 को न मोहमुपायाति विलोक्य मदिरेक्षणाम् (151.3)

24 कष्टमेतन्महापापं निर्धनत्वं शरीरिणाम् ।
न मानयति यो वक्ति न स्पृशत्यधनं जनः ॥ (137.13)

25 किं न साध्यं यत्र भार्या भर्तृचित्तानुगामिनी (129.106)

26 किं नामाऽऽपद्गतः पापं नाऽऽचरत्यपि धार्मिकः। (150.4)

27 किमकथ्यं प्रिये मित्रे कुलीनानां च योषिति (167.25)

28 किं यत्नानामसाध्यं स्यादिह लोके परत्र च । (161.16)

29 कुमार्गे न प्रवर्तन्ते महान्तोऽपि विपद्गताः । (124.62)

30 कुर्वतां याति यः कालो मातापित्रोः सुपूजनम् ।
स वृथा क्लेशकारी वै साधूनामुपजायते ।
गुरुदेवद्विजातीनां मातापित्रोश्च पूजनम् ॥
कुर्वतः सफलं जन्म देहिनस्तात जायते । (194.3-5)

31 कुर्वन्ति गर्हितं कर्म न कुलीनाः कदाचन । (124.63)

32 कुलीनो धर्मनिरतो गुरुशुश्रूषणे रतः ।
अभिमानी श्रुतधरः शिष्यः पुण्यैरवाप्यते ॥ (121 . 11)

33 कुलं रूपं वयो वित्तं विद्या वृत्तं सुशीलताम् ।
निरीक्ष्य परीक्षित सम्बन्धे विवाहे स्त्रीषु पुंसु च ॥ (165-1920)

34 केनापि साधयन्मन्त्र पणितान्ध्य साक्षीतुलम् । (124 - 47)

35 कृतापराधेऽपि जने सन्तः सकृपमानसाः । (72 . 22)
मोहयन्त्यपि विज्ञांसं विषयाणामिदं स्थितिः ॥ (in gha ms)

36 क्रोधस्तु प्रथमं शत्रुर्निष्फलो देहनाशनः ।
ज्ञानखड्गेन तं छित्त्वा परमं सुखमाप्नुयात् ॥
तृष्णा बहुविधा माया बन्धनी पापकारिणी ।
छित्त्वैतां ज्ञानखड्गेन सुखं तिष्ठति मानवः ॥
सङ्गस्तु परमोऽधर्मो देवादीनामिति श्रुतिः ।
असङ्गस्याऽऽत्मनोऽप्यस्य सङ्गोऽयं परमो रिपुः ॥
छित्त्वैनं ज्ञानखड्गेन शिवैकत्वमवाप्नुयात् ।
संशयः परमो नाशो धर्मार्थानां विनाशकृत् ॥
छित्त्वैवं संशयं जन्तुः परमोल्लासमाप्नुयात् ।
पिशाचीव विशल्याशा निर्दहत्यनिशं सुखम् ॥
पूर्णोल्लासिता छित्त्वा जीवन्मुक्तिमवाप्नुयात् ॥ (131 . 13-17)

37 क्रोधान्धानां लोभिनां च न घृणा क्वापि विद्यते । (124 . 48)

38 गान्धर्वाः स्त्रीषु कामुकाः (205 . 18)

39 गहनां कर्मणां जीवगतिं को वेत्ति तत्त्वतः ।
रहस्यं सर्वभावानां ज्ञातुं नान्यः प्रगल्भते ॥ (122.52)

40 गुरुदेवद्विजस्वामिद्रोही वध्यो मुनेरपि ।
सर्वस्यापि वधार्होऽसौ शिवस्य द्रोहकृन्नरः ॥ (169.18)

41 गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः । (80.47)

42 गुरूणां नैवमुचितं वैमनस्यं पुत्रशिष्ययोः । (95.8)

43 गृहस्थेन सदा कार्यमाचारपरिरक्षणम् ।
न ह्याचारविहीनस्य भद्रमत्र परत्र वा ॥ (221.6)

44 गृहागतस्य विमुखाः शत्रवोऽप्युत्तमा न हि । (152.20)

45 जनयित्वाऽऽत्मजान्वेदविधिनाऽग्निसंस्कृतिः ।
न कुर्याद्यः पिता तस्य नरकान्नास्ति निष्कृतिः ॥ (111.12)

46 जन्मना खलु यत्पुंसां विहितं परमेष्ठिना ।
कदाचिन्नान्यथा तद्वै वृथा क्लिश्यन्ति जल्पकाः ॥ (125.39)

47 जातस्य नियतो मृत्युः पतनं च तथोन्नतेः ।
विप्रयोगावसानं तु संयोगः संचयः (संभवः in 'क') क्षयः ।
विज्ञाय न बुधाः शोकं न हर्षमुपयान्ति वै ।
तेषामेवेतरे चेष्टां शिक्षन्तः सन्ति तादृशाः ॥ (212.89.90)

48 जाते पराभवे घोरे यो न कुर्यात्प्रतिक्रियाम् ।
नराधमेन किं तेन जीवता वा मृतेन वा ॥ (127.19)

49 जायैव परमं मित्रं लोकद्वयहितैषिणी।
सा चेत्कुलीना प्रियभाषिणी च पतिव्रता रूपवती गुणाढ्या।
संपत्सु चाऽऽपत्सु समानरूपा तया ह्यसाध्यं किमिह त्रिलोक्याम्
(129·107(108))

50 जीवो जीवस्य चाशनम् (80·46)

51 त एव धन्या लोकेऽस्मिन्येषामतिथयो गृहात्।
पूर्णाभिलाषा निर्यान्ति जीवन्तोऽपि मृताः परे॥
भोजने तृप्तिविच्छेदे तु आत्मार्थं कल्पितं तु यत्।
अतिथिभ्यस्तु यो दद्याद्दत्ता तेन वसुंधरा ॥
(163·15, 16)

52 तज्जीवितं यस्तु यशोनिधानं स एव मृत्युर्यशसो यदिरोधि।
(129·38)

53 तथा प्रभृति वै भ्राता भ्रातुरन्वेषणे द्विजाः।
प्रयातो नायाति क्षिप्रं तत्र कार्यं विपश्चिता॥ (3·24)

54 तपसा किं न सिध्यति। (129,47)

55 तपसा धार्यते प्रजाः (141·21)

56 तावद्गुणा गुरुत्वं च यावन्नार्थयते परम्।
अर्थी चेत्पुरुषो जातः क्व गुणाः क्व च गौरवम्॥
तावत्सर्वोत्तमो जन्तुस्तावत्सर्वगुणालयः।
नमस्यः सर्वलोकानां यावन्नार्थयते परम्॥ (137.11, 12)

57 तावद्धैर्यनिधिर्ज्ञानी मतिमाञ्चिजितेन्द्रियः ॥
यावन्न कामिनीनेत्रपाशुराशिर्निबध्यते ।
विशेषतो रहःसंस्थां कामिनिमायतेक्षणाम् ॥
विलोक्य न मनो याति कस्य कामेषु वश्यताम् ।
अतः स्वान्यपुरुषदर्शनं न कदाचन ॥
कुलवध्वा रहः कार्यं भीतया शीलविप्लुतेः । (152. 6-9)

58 तावत्पुंभिर्जीवितव्यं यावल्लक्ष्मीदृढं वपुः ।
यावदाज्ञाऽप्रतिहता तीर्थादावन्यथा मृतिः ॥ (123. 40)

59 तुष्टे भर्तरि नारीणां तुष्टाः स्युः सर्वदेवताः ।
विपर्यये तु नारीणामपरयं नाशमाप्नुयात् ॥ (80. 40)

60 दत्तस्य दीयमानस्य धनस्यान्तो न विद्यते (47. 93)

61. दावप्रवेशोऽपि सुखाय नूनं स्वप्नेऽप्यवेक्ष्या न सपत्नलक्ष्मीः (124. 6)

62 दिवसः को विना सूर्यं विना चन्द्रेण का निशा (185. 27)

63 दूरादभ्यागतं श्रान्तमनुगच्छन्ति देवताः ।
तस्मिंस्तृप्ते तु तृप्ताः स्युरतृप्ते तु विपर्ययः ॥
अतिथिश्चापवादी च द्वावेतौ विश्वबान्धवौ ।
अपवादी हरेत्पापमतिथिः स्वर्गसंक्रमः ॥
अभ्यागतं पथि श्रान्तं सावज्ञं योऽभिवीक्षते
तत्क्षणादेव नश्यन्ति तस्य धर्मयशःश्रियः ॥ (163. 19-21)

64 देहीति वचनद्वारा देहस्थाः पञ्च देवताः ।
सद्यो निर्गत्य गच्छन्ति धीश्रीह्रीशान्तिकीर्तयः ॥ (137. 10)

65 द्वेषिविश्वस्तबुद्धिनां न चित्ते करुणाकणः । (124. 70)

66 दैवविहितं कोऽतिक्रामितुमीश्वरः (111·69)

67 धर्ममेव परं मन्ये प्राणैः कण्ठगतैरपि ।
माता पिता सुहृद्बन्धुर्धर्म एव शरीरिणाम् ॥ (170·39)

68 धर्ममेव परं मन्ये यथेच्छसि तथा कुरु ।
ब्राह्मणांश्च गुरून्देवान्वेदान्धर्मं जनार्दनम् ॥
यस्तु निन्दयते पापो नासौ स्पृश्योऽथ पापकृत् ।
उपेक्षणीयो दुर्वृत्तः पापात्मा धर्मदूषकः ॥ (170·45-46)

69 धर्मार्थज्ञानकामानां को नु तृप्तः प्रशस्यते ।
उत्कर्षप्राप्तिरेतेषां सर्वे श्लाघ्या शरीरिणाम् ॥
स्वेनैव व्यवसायेन धन्या जीवन्ति जन्तवः ।
परदत्तार्थसंतुष्टाः कष्टजीविन एव ते ॥
स पुत्रः शस्यते लोके पितृभिश्चाभिनन्द्यते ।
यः पैत्र्यमभिलिप्सेत न वाञ्छाऽपि नु कुण्डलः ॥
स्वबाहुबलमाश्रित्य योऽर्थानर्जयते सुतः ।
स कृतार्थो भवेल्लोके पैत्र्यं वित्तं न तु स्पृशेत् ॥
स्वयमार्ज्य सुतो वित्तं पित्रे दास्यति बान्धवे ।
तं तु पुत्रं विजानीयादितरो योनिकीटकः ॥ (170-9-13)

70 धिग्धिक्पितृविहीनानां जीवितं पापकर्मणाम् । (127·12)

71 न गन्तव्यं तत्र देशे दंपत्योः स्थितयोः रहः ।
सामान्यमात्रतो न्यायः किं पुनः शूलपाणिनि ॥ (128·10)

72 न निर्मलकुलोत्पन्ना मनः कुर्वन्ति पातके (124·84)

73 न च त्रैलोक्यराज्येऽपि कैवल्ये वा सुखं मनाक् ।
तद्दुःखमपि वा यत्तु निर्वैरस्यादवाप्यते ॥ (106·7)

74 न वै स्त्रैणानि सख्यानि हृदयानि महामते
शालावृकाणां यादृशि तस्मात्त्वं भूप मा शुचः ।
को नाम लोके राजेन्द्र कामिनीभिर्न वञ्चितः ।
वञ्चकत्वं नृशंसत्वं चञ्चलत्वं कुशीलता ।
इति स्वाभाविकं यासां ताः कथं सुखहेतवः ।
कालेन को न निहतः कोऽर्थी गौरवमागतः
श्रिया न भ्रामितः को वा योषिद्भिः को न खण्डितः ।
स्वप्नमायोपमा राजन्मदविप्लुतचेतसः ॥
सुखाय योषितः कस्य शान्त्यै तद्विज्वरो भव ।
विहाय शंकरं विष्णुं गौतमीं वा महामते ॥
दुःखितानां शरणं नान्यद्विद्यते भुवनत्रये ॥ (151.12-16
Bhāgavata 7.9

75 न शोचन्ति महात्मानस्त्वादृशा व्यसनागमे
चिन्तयन्ति प्रतीकारं दैवमथाथ मानुषम् (123.16)

76 न सिद्धः क्वापि केषांचिद्विना सद्गुरुणा यतः । (158.21)

77 न हि कश्चिन्नरो प्रदत्तं पुनराहरेत् । (35.56)

78 न हि मातृसमो बन्धुर्जन्तूनामस्ति भूतले । (38.38)

79 सर्वं कर्मैव नाकर्मी प्राणी क्वाप्यत्र विद्यते । (145.10)

80 नान्नदानसमं पुण्यं त्रिषु लोकेषु विद्यते । (83.21)

81 नानाविधेषु पापेषु नानृतात्पातकं परम् । (135.9)

82 नापराध्ये न संकुप्ये नैवाधर्मं प्रवर्तये ।
अधर्मकारिणः पापाः शास्या एव महात्मनाम् ॥ (146.16)

83 नामित्रेष्वपि कर्तव्यं सद्भिर्जिह्मं कदाचन
श्रोत्रिये चान्त्यजे वाऽपि समं चन्द्रः प्रकाशते ॥
(159.34)

८४ नारणे मरणादन्यत्पातकं विद्यते महत् । (124.58)

८५ नास्त्येव हृदये नूनं पापिनां करुणाकणः । (163.33)

८६ निर्गुणेष्वप्यपत्येषु माता शापं न दास्यति । (32.74)

८७ निर्धनः शिवतुल्योऽपि सर्वैरप्यभिभूयते । (137.9)

८८ निवृत्तां दक्षिणां नैव प्रतिगृह्णन्ति सूरयः ।
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ॥
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ।
भूमेः स्वपरदत्ताया हरणान्नाधिकं क्वचित् ॥
पापमस्ति महारौद्रं न स्वीकुर्मः पुनस्तु ताम् । (155.6-8)

८९ निष्कृतिर्ब्रह्महन्तॄणां क्वापि न विद्यते । (123.57)

९० निष्पापतायां जातायां सिध्यन्ति हि मनोरथाः । (124.16)

९१ निहन्तुमभ्युद्यतेषु वक्तव्यं हितमुत्तमैः । (163.28)

९२ नेदं युक्ततरं पुत्र भूषणं विनयेन हि ।
वर्तितुं युक्तमित्युक्तं वैपरीत्यं न युज्यते ॥ (159.33)

९३ पतिरेव गतिः स्त्रीणां सर्वदैव विशेषतः । (111.69)

९४ पतिरेव गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ।
अभ्यागतमनुप्राप्तं वचनैस्तोषयन्ति ये ॥
तेषां वागीश्वरी देवी तृप्ता भवति निश्चलम् ।
तस्मात्तस्य प्रदानेन शक्रस्तृप्तिमवाप्नुयात् ॥
पितरं पादशौचेन अन्नाद्येन प्रजापतिः ।
तस्योपचाराद्वै लक्ष्मीर्विष्णुना प्रीतिमाप्नुयात् ॥
शयने सर्वदेवास्तु तस्मात्पूज्यतमोऽतिथिः ।
अभ्यागतमनुप्राप्तं सूर्योढं गृहमागतम् ॥
तं विद्याद्देवरूपेण सर्वक्रतुफलो ह्यसौ ॥ (80.47-51)

९५ पत्युः शृण्वन्ति या निन्दां तासां पापावधिः कुतः।
यादृशस्तादृशो वाऽपि पतिः स्त्रीणां परा गतिः॥ (109·7)

९६ परलोके च धर्मे च सत्पुत्रसदृशं न च।
आर्तस्य पुरुषस्येह भार्यावद्भेषजं न हि। (129·110)

९७ पराभिभूतामालोक्य कान्तां कः सोढुमीश्वरः। (152·11)

९८ परार्तिशमनादन्यच्छ्रेयो न भुवनत्रये। (170·64)

९९ पुंसः सर्वेषु कार्येषु भार्यैवेह सहायिनी।
स्वल्पानामपि कार्याणां नहि सिद्धिस्तया विना॥ (129·60)

100 पुलाका इव धान्येषु पुत्तिका इव पक्षिषु।
तथैव तान्सर्वे मन्ये येषां धर्मो न विद्यते॥
चतुर्णां पुरुषार्थानां धर्मः प्रथम उच्यते।
पश्चादर्थश्च कामश्च स धर्मो मयि तिष्ठति॥ (170·35

101 प्रलापाचरणं दृष्ट्वा क्रोधः कस्य न जायते। (147·17)

102 प्रवर्तते विना हेतुं न कोऽपि क्वापि जातुचित्। (116·7)

103 प्रापुः क्षयं न के नाम गुरुस्वामिसखिद्रुहः। (152·28)

104 प्रौढोऽपि कोऽत्र जानाति विचित्रं भवितव्यताम्। (108·51)

105 बहवः स्युः सुताः केचिन्नैव ते कुलतन्तवः
एक एव सुतः कश्चिद्येन तदध्रियते कुलम्।
कुलस्याऽऽधारभूतो यो यः पित्रोः प्रियकारकः।
यः पूर्वजानुद्धरति स पुत्रस्त्वपरो गदः॥ (165·41·42)

106 ब्रह्मध्वजरूपदर्शनं पापं न कथाचिद्विनश्यति। (123·74)

107 ब्रह्महा वर्णिभिः किन्तु श्वपचैरपि जातुचित्।
न स्प्रष्टव्यो महाबुद्धे द्रष्टव्यो न कदाचन॥ (123·54)

108 भर्तरि प्रतिकूलानां योषितां जीवनेन किम्। (144·13)

109 भोगादृते न क्षयोऽस्ति प्राक्तनानामिहांहसाम्। (150·5)

110 भूतानां विषये प्रीतिर्वत्स स्वाभाविकी यतः।
सत्सङ्गतो महापुण्याभिवृद्धिर्दैवतो भवेत्।
अत्यर्थमनुतप्तेयं प्रागाचरितपुण्यतः॥ (92·45-46)

111 भक्तानां दुःखपाथोब्धौ पुत्रः प्रवहणं परम्। (108-81)

112 मध्ये मध्ये पथभ्रंशाद्वरं निःश्रीकता नृणाम् (122·51)

113 मनसाऽप्यन्यपुरुषं पापिष्ठाः कामयन्ति याः।
अन्ते यान्ति नरकांस्तासां सर्वेऽपि पूर्वजाः॥ (87·61)

114 महतां दर्शनं ब्रह्मन् जायते नहि निष्फलम्।
द्वेषादज्ञानतो वाऽपि प्रसङ्गाद्वा प्रमादतः॥
अयसः स्पर्शसंस्पर्शो रुक्मत्वायैव जायते। (163·38·39)

115 महत्यभ्यागते कुर्यात्प्रत्युत्थानं न यो मदात्।
स धर्मादिपरिभ्रष्टो निरयं तु समाप्नुयात्॥ (173·21)

116 महाभये त्वनुगते न्यायः कोऽन्यत्र वर्ण्यते। (123·18)

117 मात्रा स्नेहेन सर्वेषु वर्तितव्यं सुतेषु वै। (6·25)

118 मानभङ्गाद्वरं तात मरणं हि मनस्विनाम्। (146·10)

119 मांसात्मिष्टतरं नास्ति भक्ष्यभोज्यादिकेषु च।
तस्मान्मांसं न भुञ्जीत नास्ति मिष्टैः सुखोदयः।
गोसहस्रं तु यो दद्याद्यस्तु मांसं न भक्षयेत्।
समावेतौ पुरा प्राह ब्रह्म वेदविदां वरः॥ (216-64, 65)

120 मिथ्यापवादमपि हि न सहन्ते कुलोन्नताः। (154.12)

121 यतो धर्मस्ततो मुक्तिः स्वधर्मः किं विनश्यति। (170.26)

122 यत्पुरा विहितं कर्म प्राणिना साध्वसाधु वा।
फलं तदनुरोधने प्राप्यतेऽपि भवान्तरे॥ (165.24)

123 यत्राऽऽनुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते। (138.13)

124 यत्रोपकारोऽनेकानामेकनाशे भविष्यति। न दोषस्तत्र पृथिवि
तपसा धारये प्रजाः॥ न दोषमत्र पश्यामि नाऽऽचक्षेऽनर्थकं वचः।
अस्मिन्निपातिते सौख्यं बहूनामुपजायते॥ पुण्यमस्त्वत्रैव
प्रादुरश्वमेधशताधिकम्॥ (141.21.22)

125 यदपथ्यकृतं किञ्चित्साध्वसाधु यया तया।
मात्मस्थं सर्वमप्येतत्तस्मान्मातेति गीयते॥ (89.20)

126 यद्दीयते तदेवेह परस्मिंश्चोपतिष्ठति। (136.21)

127 यद्भाव्यं तद्भविष्यति। (165.26)

128 यस्तु निन्द्यते पापो नासौ स्पृश्योऽथ पापकृत्।
उपेक्षणीयो दुर्वृत्तः पापात्मा धर्मदूषकः॥ (170.46)

129 ये कुर्वन्त्यनिशं स्नेहं त एव कृतिनो नराः। (110.75)

130 ये महाकुलसंभूता विज्ञातसकलागमाः।
तत्प्रतिकूलमश्नाति न यान्त्यत्र विपर्ययम्॥ (163.27)

131 यो याति कैतवसमां स चापि क्लेशभाग्भवेत् ।
द्यूतमद्याभिधादीनि व्यसनानि नृपात्मज: ॥
पापिनामेव जायन्ते सदा पापात्मकानि हि ।
दुःखैकमपथ्यनर्थाय पापाय नरकाय च ॥
नानासनाभिलापाद्यै: कृतै: कैतवपण्डितै: ।
कुलीना: कलुषीभूता: किं पुन: कितवो जन: ॥
कितवस्य तु या जाया तप्यते नित्यमेव सा ।
स चापि कितव: पापो योषितं विद्ध्य तप्यते ॥ (171·29·32)

132 योषितां दुर्विलसितं क: संवरितुमीश्वर: । (100·12)

133 यो हि वेदे च शास्त्रे च ग्रन्थधारणतत्पर: ।
न च ग्रन्थार्थतत्त्वज्ञस्तस्य तद्धारणं वृथा ॥
भारं स वहते तस्य ग्रन्थस्यार्थं न वेत्ति य: ।
यस्तु ग्रन्थार्थतत्त्वज्ञो नास्य ग्रन्थागमो वृथा ॥
ग्रन्थस्यार्थं स पृष्टस्तु मादृशो वक्तुमर्हति ।
यथातत्त्वाभिगमनादर्थं तस्य स विन्दति ॥
न य: समुत्सुक: कश्चिद्ग्रन्थार्थं स्थूलबुद्धिमान् ।
स कथं मन्दविज्ञानो ग्रन्थं वक्ष्यति निर्णयात् ॥
अज्ञात्वा ग्रन्थतत्त्वानि वादं य: कुरुते नर: ।
लोभाद्वाऽप्यथवा दम्भात्स पापी नरकं व्रजेत् ॥
निर्णयं चापि छिद्रात्मा न तद्वक्ष्यति तत्त्वत: ।
सोऽपीहास्यार्थतत्त्वज्ञो यस्मान्नैवाऽऽत्मवानपि ॥ (242·13·18)

134 यौवनं लब्ध्वा स्वयं विना सौख्यानुकूल्यत: ।
धनं विना तत्कथं स्यादहो धिङ्निर्धनं नरम् । (170-7)

135 राजा निरङ्कुश: (154·25)

136 रूपेण यशसा चैव भवेत्स्त्री का न गर्विता । (203·69)

137 विकारास्तात भावानां दुर्निवारा: शरीरिणाम् । (146·35)

138 विद्यां प्राप्यापि ये मोहात्स्वगुरोः पारितोषिकम् ।
न प्रयच्छन्ति निरयं ते यान्त्याचन्द्रतारकम् ॥ (121·15)

139 विद्युच्चञ्चलचित्तानां क्व स्थैर्यं ननु योषिताम् । (151·6)

140 विद्वांसोऽपि हि निर्दोषे यदि कुप्यन्ति मोहिताः ।
तदा न दोषो मूर्खाणां द्वेषाग्निप्लुष्टचेतसाम् ॥ (146·18)

141 विद्यातृप्तिहितं मार्गं को नु वाञ्छेति पण्डितः । (171·34)

142 विधिर्हि बलवांस्तात कां कां चेष्टां न चेष्टते । (159·10)

143 विपाककटु यत्कर्म न तच्छंसन्ति पण्डिताः । (203·37)

Viṣṇu Pancamā
ślo a,
A·30·44.

144 विषं वृद्धस्य युवती वृद्धाया अमृतं युवा । (107·47)

Garuḍa,
Pūrvakhaṇḍa
A 114·26

145 वेदात् लौकिकं ज्येष्ठं लोके धर्मात्सुखं भवेत् । (170·28)

146 वृथा स्वार्थपरिश्रमाः । (125·38)

147 वृद्धत्वमेव मरणं जीवतामपि देहिनाम् । (146·14)

148 शिवप्रसादात्किं नाम देहिनामिह दुर्लभम् । (152·25)

149 [illegible]णुसरिन्नाथप्रसादादाप्यते न किम् । (171·48)

150 संग्रामे रिपवः पृष्ठं पश्येयुस्ते सदा हि ।
जीवतामेव मरणमेतदेव हि मानिनाम्
पृष्ठं पलायमानानां यत्पश्यन्त्यहिता रणे । (124·78)

151 सतां प्रभूणां नेयं स्याद्वृत्तिः सद्वृत्तिकारिणाम्।
सन्तो दास्यन्ति भृत्येभ्यो मदुपात्तहरो भवान्॥ (90.18)

152 सत्यं ब्रह्म परे लोके सत्यं व्रतेषु चोत्तमम्।
सत्यं स्वर्गसमायातं तस्मात्सत्यं न संत्यजेत्॥ (227.55)

153 सत्येनावाप्यते सौख्यं यत्किंचिज्जगतीगतम्।
सत्येनार्कः प्रतपति सत्येनापो रसात्मिकाः।
ज्वलत्यग्निश्च सत्येन वाति सत्येन मारुतः॥
धर्मार्थकामसंप्राप्तिर्मोक्षप्राप्तिश्च दुर्लभा।
सत्येन जायते पुंसां तस्मात्सत्यं न संत्यजेत्॥ (227-52-58)

Mārkaṇḍeya; Skanda Nāgarkhaṇḍa
51.43

154 सन्ततिप्रापणं लोके दुर्लभं (124.120)

155 सन्तः परहिते रताः। (170.65)

156 सपत्नैरभिभूतानां जीवितं धिङ्मनस्विनाम्। (160.16)

157 समेन योध्योऽयुक्तः। (८१.४)

158 सर्वमेकपदे नष्टं दानमश्रोत्रिये यथा। (212.30)

159 सर्वसंपत्तियुक्तोऽपि पापी दग्धद्रुमोपमः।
निष्किंचनोऽपि सुकृती दृश्यते चन्द्रमौलिवत्॥ (123.184)

160 सर्वेभ्यो ह्यधिका माता गुरुभ्यो गौरवेण हि। (158.6)

161 सर्वेषामेव शापानां प्रतिघातो हि विद्यते।
न तु मात्राभिशप्तानां क्वचिच्छापनिवर्तनम्॥ (32.70)

17



162 सर्वोपभोगसहिते वासः कस्य न रोचते। (42.43)

163 संसारदुःखखिन्नानामगतीनां शरीरिणाम्।
पुत्रालिङ्गनमेवात्र परं विश्रान्तिकारणम्। (154.19.20)

164 सा नैव योषिल्लभतेऽभिजाते। (155.19)

165 सापत्न्यं योऽनुमन्यते तस्य जीवो निरर्थकः। (97.7)

166 सुखं धर्मे प्रतिष्ठितम्। पापे दुःखं भयं शोको दारिद्र्यं क्लेश
एव च॥ यतो धर्मस्ततो मुक्तिः स्वधर्मः किं विनश्यति।
(170.26)

167 सुखमूला हि दाराः। (228.25)

168 स्त्रियोऽस्वतन्त्राः पुरुषप्रधानाः। (129.32)

169 स्त्रीणामभीष्टदं नान्यद्भर्तृवाक्यं विना क्वचित्। (128.6)

170 स्त्रीणामयं परो धर्मो यद्भर्तुरनुवेशनम्।
वेदे च विहितो मार्गः सर्वलोकेषु पूजितः॥
व्यालग्राही यथा व्यालं बिलादुद्धरते बलात्।
एवं त्वनुगता नारी सह भर्त्रा दिवं व्रजेत्॥ (80.75.76)

171 स्त्रीणामेष स्वभावो वै पुंस्कामा योषितो यतः। (102.14)

172 स्त्रीणामेष स्वभावोऽस्ति रतं गोपायितं भवेत्। (108.27)

173 स्त्रीणां विवादं ता एव स्त्रियो जानन्ति नेतरे। (137.26)

174 स्त्रीणां स्वभावं जानन्ति स्त्रिय एव सुराधिप। (129.51)

175 स्मरग्रहीतो जातः को दुश्चेष्टं न चेष्टते। (89.29)

176 स्मरसायकनिर्भिन्नहृदयाः किं न कुर्वते। (87.57)

177 स्वकृतं भुज्यते भूतैः सर्वैः सर्वत्र सर्वदा ।
न कोऽपि कस्यचित्किंचित्करोत्यत्र हिताहितं ॥
यादृशं चोप्यते बीजं फलं भवति तादृशम् ।
रसालः स्यान्न निम्बस्य बीजाज्जात्वपि कुत्रचित् ॥

(136 · 19-20)

178 स्वभावचपला ब्रह्मन्योषितः सकला अपि । (101 · 15)

179 स्वामिनो वैकृतं दृष्ट्वा कः क्षमेतोन्नताशयः । (169 · 42)

180 स्वीकृतत्यागपापाद्धि देहिनां मरणं वरम् । (146 · 37)

181 क्षणविध्वंसिनि सुखे का नामाऽऽस्था महात्मनाम् ।

(138 · 11)

---